# श्रीवामन महापुराणम्

# THE VĀMAN MAHĀPURĀṆAM

राष्ट्रिय-संस्कृत-संस्थान

नई दिल्ली

# अथ वामनपुराणस्य विषयानुक्रमणिका प्रारभ्यते ।


| अध्यायाः विषयाः | पृष्ठाङ्काः | अध्यायाः विषयाः | पृष्ठाङ्काः | अध्यायाः विषयाः | पृष्ठाङ्काः |
|---|---|---|---|---|---|
| १ हरलीलितम् .... .... .... | १ | १२ कर्मविपाकवर्णनम् .... .... | २४ | २३ बलिदैत्यवंशवर्णनम् .... .... | ४८ |
| २ नरोत्पत्तिप्रलयकथनम् .... .... | २ | १३ भुवनकोशवर्णनम् .... .... | २६ | २४ बलिजिताः सर्वेऽपि देवादयः कश्यपं शरणं जग्मुस्ततो ब्रह्माणं शरणमीयुरिति कथाभागः .... .... | ४९ |
| ३ हरिहरयोः संवादः .... .... | ४ | १४ सुकेश्यनुशासनम् .... .... | २८ | २५ कश्यपादीनां क्षीरसागरं प्रति गमनम् | ५० |
| ४ हरिवीरभद्रयुद्धम् .... .... | ५ | १५ सुकेशिचरितं लोलार्कजननं च .... | ३२ | २६ कश्यपकृतभगवत्स्तुतिः .... .... | ५१ |
| ५ शिवस्य कालस्वरूपताकथनम् .... | ७ | १६ अशून्यशयनाद्वितीया कालाष्टमी व्रतम् | ३४ | २७ अदितिकृतभगवत्स्तुतिः.... .... | ५२ |
| ६ कामदाहः .... .... .... | ९ | १७ महिषासुरोत्पत्तिः .... .... | ३६ | २८ अदित्यै वरप्रदानम् .... .... | ५३ |
| ७ प्रह्लादयुद्धम् .... .... .... | १३ | १८ देवीमाहात्म्यम् .... .... | ३९ | २९ प्रह्लादकृतबलिनिन्दाशापदाने .... | ,, |
| ८ प्रह्लादवरप्रदानम् .... .... | १५ | १९ देवीमाहात्म्यम् .... .... | ४० | ३० ब्रह्मकृतवामनस्तुतिः .... .... | ५५ |
| ९ देवदानवयुद्धम्.... .... .... | १८ | २० महिषासुरवधः .... .... | ४२ | ३१ वामनस्य बलेश्च चारितम् .... | ५७ |
| १० अन्धकाविजयः .... .... | १९ | २१ उमासंभवः .... .... | ४४ | | |
| ११ पुष्करद्वीपवर्णनम् .... .... | २२ | २२ सरोमाहात्म्यम् .... .... | ४६ | | |

न्भूयो वक्तुमर्हथ ॥२९॥[ऋषय ऊचुः ।] शृणुष्व मनुजादीनां धर्मांस्तु क्षणदाचर ॥ ये वसन्ति महीपृष्ठे नरा द्वीपेषु सप्तसु ॥ ३० ॥ योजनानां प्रमाणेन पञ्चाशत्कोटिरायता ॥ जलोपरि महीयं हि नौरिवास्ते सरिज्जले ॥ तस्योपरि च देवेशो ब्रह्मा शैलेन्द्रमुत्तमम् ॥ ३१ ॥ कर्णिकाकारमत्युच्चं स्थापयामास सत्तमः ॥ स चेमां निर्ममे पुण्यां प्रजां देवश्चतुर्दिशम् ॥ ॥ ३२ ॥ स्थानानि द्वीपसंज्ञानि कृतवांश्च प्रजापतिः ॥ तत्र मध्ये च कृतवाञ्जम्बूद्वीपमिति श्रुतम् ॥ ३३ ॥ तल्लक्ष योजनानां च प्रमाणेन निगद्यते ॥ ततो जलनिधिः क्षारो बाह्यतो द्विगुणः स्थितः ॥ ३४ ॥ तस्यापि द्विगुणः प्लक्षो बाह्यतः संप्रतिष्ठितः ॥ ततस्त्विक्षुरसोदश्च बाह्यतो वलयाकृतिः ॥ ३५ ॥ द्विगुणः शाल्मलिद्वीपो द्विगुणोऽस्य महोदधिः ॥ सुरोदो द्विगुणस्तस्य तस्माच्च द्विगुणः कुशः ॥३६॥ घृतोदो द्विगुणश्चैव कुशद्वीपात्प्रकीर्तितः ॥ घृतोदाद् द्विगुणः क्रौञ्चो दध्योदो द्विगुणस्ततः ॥ ३७ ॥ समुद्राद्द्विगुणः शाकः शाकाद्दुग्धाब्धिरुत्तमः ॥ द्विगुणः संस्थितो यत्र शेषपर्यङ्कगो हरिः ॥ ३८ ॥ तस्माच्च पुष्करद्वीपः स्वादूदस्तदनन्तरम् ॥ एते च द्विगुणाः सर्वे परस्परमवस्थिताः ॥ ३९ ॥ चत्वारिंशदिमाः कोट्यो लक्षाश्च नवतिः स्मृताः ॥ योजनानां राक्षसेन्द्र पञ्च चातिसुविस्तृताः ॥ ४० ॥ जम्बूद्वीपात्समारभ्य यावत्क्षीराब्धिरन्ततः ॥ कोट्यश्चतस्रो लक्षाणां द्वौ पञ्चाशच्च राक्षस ॥ ४१ ॥ पुष्करद्वीपमानोऽयं तावानन्ते महोदधिः ॥ लक्षमण्डकटाहेन समन्तादभिपूरितम् ॥ ४२ ॥ एवं द्वीपास्त्विमे सप्त पृथग्धर्माः पृथक् क्रियाः ॥ गदिष्यामस्तव वयं शृणुष्व त्वं निशाचर